**प्रोत** त्रि॰ प्र+वे—ऊतौ क्त सम्प्रसारणम्। १प्रकर्षेण स्यूते २ग्रथिते वस्त्रे न॰ जटा॰। भावे क्त। ३सीवने न॰।

**प्रोतोत्सादन** न॰ प्रोतं सत् उत्सादयति उत्+सादि-ल्यु। १वस्त्रकुट्टिमे २छत्रे च त्रिका॰।

**प्रोत्फल** पु॰ प्रकर्षेण उत्फलति प्र+उद्—फल—अच्। सिं-हलाङ्गूलाकारपुष्पवति वृक्षभेदे शब्दमाला।

**प्रोत्फुल्ल** त्रि॰ प्र+उत्+फुल्ल—विकाशे अच्। विकसिते।

**प्रोत्साहन** न॰ प्रकर्षेण उत्साहनम्। प्रवृत्तस्य कर्त्तव्ये कर्मणि १प्रकर्षेण यत्नसम्पादने सा॰द॰उक्ते २नाट्यालङ्का-रभेदे। प्रोत्साहनञ्च इत्यादिना तान्युद्दिश्य "प्रोत्सा-हनं स्यादुत्साहगिरा कर्मणि योजनम्" इति लक्षि-तम्। यथा "कालरात्रिकरालेयं स्त्रीति किं विचिकित्स-सि। तज्जगत्त्रितयं त्रातुं तात! ताड़य ताड़काम्"।

**प्रोथ** परिपूर्णतायाम् सामर्थ्ये च भ्वा॰उभ॰अक॰सेट्। प्रो-थति ते अप्रोथीत् अप्रोथिष्ट पुप्रोथ थे। ऋदित् चङि न ह्रस्वः। अपुप्रोथत् त।

**प्रोथ** पु॰न॰ प्रु+थक्। १प्रस्थिते "इष्टानुदकान्तञ्च प्रियं प्रोथमनुव्रजेत्"। २अश्वनासिकायाम् अमरः। ३कट्यां पु॰ मेदि॰ ४शाटके पु॰ त्रिका॰। ५स्त्रीगर्भे पु॰ विश्वः ६गर्त्ते ७भीषणे ८स्फिग्देशे ९अश्वमुखे च संक्षिप्तसारः १०पथिके त्रि॰ ११प्रथिते त्रि॰ त्रिका॰ १२स्थापिते त्रि॰ सि॰कौ॰।

**प्रोथथ** पु॰ प्रोथ—बा॰ अथ। सुखशब्दे ऋ॰ १०।६४।६भा॰।

**प्रोष** पु॰ प्रुष—दाहे भावे घञ्। सन्तापे राजनि॰।

**प्रोषक** पु॰ देशभेदे भा॰ भी॰ ९अ॰।

**प्रोषित** त्रि॰ प्र+वस—क्त इट्। प्रवासं गते विदेशं गते। "आर्त्तार्त्ते मुदिता हृष्टे प्रोषिते मलिना कृशा" काशीख॰ पतिव्रतालक्षणम्।

**प्रोषितभर्तृका** स्त्री प्रोषितः भर्त्ता यस्याः कप्। यस्याः पतिः विदेशं गतस्तस्यां स्त्रियाम् "नानाकार्य्यवशाद् यस्यादूरदेशं गतः पतिः। सा मनोभवदुःखार्त्ता भवेत् प्रोषितभर्तृका" सा॰द॰।

**प्रो(प्रौ)ष्ठ** पु॰प्रकृष्ट ओष्ठोऽस्य वा वृद्धिः। (पुँटि) मत्स्यभेदे रायमुकुटः। स्त्रियां ङीष्। २देशभेदे भा॰भी॰ ९अ॰। ३गवि च पुंस्त्री॰ सि॰कौ॰। प्रोष्ठपदशब्दे दृश्यम्।

**प्रो(प्रौ)ष्ठपदा** स्त्री प्रो(प्रौ)ष्ठो गौस्तस्येव पदं यस्याः। नक्षत्रविशेषे। तद्युक्ता पौर्णमासी अण् सा यत्र मासे पुनरण् वा न वृद्धिः। १चान्द्रभाद्रमासे अमरः। प्रोष्ठ-पदासु जातः अण् उत्तरपदवृद्धिः। प्रोष्ठपाद तज्जे २माणवके। "जे प्रोष्ठपदानाम्" पा॰ उक्तेः भवादौ नोत्तरपदवृद्धिः प्रौष्ठपद इत्येव।

२अश्विन्यादिषु पञ्चविंशषड्विंशनक्षत्रयोः स्त्री ब॰व॰ पूर्वोत्तरभाद्रपदयोः प्रत्येकं द्वित्वेन चतुष्कत्वात् बहुत्वम्। प्रोष्ठपदाभिर्युक्ता पौर्णमासी अण्। प्रौष्ठपदी चान्द्र-३भाद्रपौर्णमास्यां स्त्री ङीप् "प्रौष्ठपद्यामतीतायाम्"। प्रेतशब्दे दृश्यम्।

**प्रोष्य** अव्य॰ प्र+वस—ल्यप्। विदेशं गत्वेत्यर्थे तस्य पापीयसा सह मयू॰ समा॰ प्रोष्यपापीयस्। विदेशं गत्वा पापव-त्तरे त्रि॰स्त्रियां ङीप्। "राघवः प्रोष्यपापीयान्" भट्टिः

**प्रो(प्रौ)ह** पु॰ प्र+ऊह—क वा वृद्धिः। प्रकृष्टवाहके

**प्रोहकटा** पु॰ प्रोह कटे इत्युच्यते यस्यां क्रियायाम् मयूर॰ समा॰। कटसम्बोधनकप्रकृष्टोहार्थनिर्देशक्रि-यायाम्। एवं प्रोहकर्दमा इत्यपि तत्र पाठान्तरे कर्द-मसम्प्रदानकोहनिर्देशक्रियायाम्।

**प्रोह्यपदि** अव्य॰ प्रोह्यौ पादौ यत्र प्रहरणे द्विदण्ड्या॰ स॰इच् समा॰ पद्भावः। प्रकर्षेण द्वाभ्यां पादाभ्यां प्रहरणे

**प्रौढमनोरमा** प्रौढ़ानां प्रगल्भानां मनोरमयति रम॰ णिच् अच्। भट्टोजिदीक्षितकृतायाम् सिद्धान्तकौमुदी-व्याख्यायाम्। [२निपुणे च धरणिः।

**प्रौण** त्रि॰ प्र+ओणृ—अपसारके अच्। १प्रकर्षेण अपसारके

**प्रौष्ठिक** त्रि॰ प्रोष्ठोऽस्त्यस्य ठन्। प्रकृष्टौष्ठयुते ततः शिवा॰ अपत्ये अण् प्रौष्ठिक तदपत्ये। [भाष्यम्।

**प्लक** पु॰प्र+कै—क रस्य लः। स्त्रीणामधोऽङ्गभेदे ऋ॰८।२२।१६

**प्लक्ष** भक्षणे भ्वा॰उभ॰सक॰ सेट्। प्लक्षति ते अप्लक्षीत् अप्ल-क्षिष्ट पप्लक्ष क्षे। प्लक्षः।

**प्लक्ष** पु॰ प्लक्ष्यते कीटैः प्लक्ष—कर्मणि घञ्। (पाकुड़) १वृक्षे अमरः। प्लक्षसमीपस्थानात् २निःसृतायां सरस्वत्यां च भा॰व॰ ८४अ॰। तस्याः प्लक्षप्रस्रवणात् जातत्वात् तथात्वम् "प्रभवश्च सरस्वत्याः प्लक्षप्रस्रवणं मतम्" भा॰श॰ ५०अ॰। ३प्लक्षद्वीपचिह्निते द्वीपभेदे पु॰ "प्लक्षो जम्बूप्रमाणो द्वीपः ख्यातिकरो हिरण्मय उत्थितो यत्राग्निरुपास्ते सप्तजिह्वः। तस्याधिपतिः प्रियव्रता-त्मज इध्मजिह्वः स्वं द्वीपं सप्त वर्षाणि विभज्य सप्तवर्ष-नामभ्य आत्मजेभ्य आकलय्य स्वयमात्मयोगेनोपरराम। शिवं यवसं सुभद्रं शान्तं क्षेममभृतमभयमिति वर्षा-णि। तेषु गिरयो नद्यश्च सप्तैवाभिज्ञाताः मणिकूटो